# DAV PUBLIC SCHOOLS, BHUBANESWAR
## TERM – 1 EXAMINATION , 2017-18
## CLASS – VIII
## SUBJECT – LOWER SANSKRIT

*[Time allowed: 3 hours]* *[Maximum Marks: 80]*

**निर्देशा:**

| | |
|---|---|
| (i) | अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति । |
| | खण्ड: क: (अपठित-अवबोधनम्) - ५ अङ्का: |
| | खण्ड: ख: (रचनात्मककार्यम् ) - १० अङ्का: |
| | खण्ड: ग: (अनुप्रयुक्तव्याकरणम् ) - ३० अङ्का: |
| | खण्ड: घ: (पठित-अवबोधनम्) - ३५ अङ्का: |
| (ii) | सर्वे प्रश्ना: अनिवार्या: । |
| (iii) | प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेण एव लेखनीयानि । |
| (iv) | प्रश्नसंख्या अवश्यं लेखनीया । |
| (v) | उत्तराणि संस्कृतेन एव लेखनीयानि । |
| (vi) | प्रश्नपत्रे १६ प्रश्ना: ५ च पृष्ठा: सन्ति । |

### खण्ड: क: (अपठित-अवबोधनम्) - ५ अङ्का:

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** **(5)**

स्वच्छं भारतं प्राय: अधिकांशानां भारतीयानां स्वप्न: अस्ति परं स्वप्नमात्रेण तु स्वच्छता न भविष्यति । वयं सर्वे मिलित्वा अस्यां दिशायां प्रयासं कुर्याम । वयं पश्याम: यत् जना: मार्गेषु अथवा सार्वजनिकेषु स्थानेषु यत्र कुत्रापि अवकरं क्षिपन्ति, किम् इदम् उचितम् अस्ति ? एतत् न करणीयम् यत: सर्वकार: एकाकी एव इदं कार्यं सफलं कर्तुं न शक्नोति । यदि वयं सर्वे अपि सहायतां करिष्याम: जागरुका: च भविष्याम: तदा अयं स्वप्न: अवश्यमेव पूर्ण: भविष्यति ।

**I. एकपदेन उत्तरत -** **(½ x 2 = 1)**

(क) जना: मार्गेषु किं क्षिपन्ति ?

(ख) स्वच्छं भारतं केषां स्वप्न: अस्ति ?

**II. पूर्णवाक्येन उत्तरत -** **(1 x 2 = 2)**

(क) वयं किं पश्याम: ?

(ख) अयं स्वप्न: कदा पूर्ण: भविष्यति ?

**III प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा निर्देशानुसारम् उत्तरत -** **(1 x 2 = 2)**

(क) 'कुर्याम' इति क्रियापदस्य कर्तृपदं किम् ?

(i) स्वच्छता (ii) जना: (iii) वयम् (iv) सर्वकार:

(ख) 'स्थानेषु' इति विशेष्यपदस्य किं विशेषणम् ?

(i) मार्गेषु (ii) सार्वजनिकेषु (iii) यत्र (iv) जना:

## खण्ड: ख: (रचनात्मककार्यम्) - १० अङ्का:

**2. भवत: अनुज: प्रमोद: सर्वदा चलभाषितयन्त्रेण वार्तालापं करोति । अस्य यन्त्रस्य अति-प्रयोग: हानिकर: इति सूचयित्वा तं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तशब्दै: पूरयत -** (½ x10 = 5)

ए ३/५१ (i) ..............

नवदिल्ली

तिथि: ...............

प्रिय अनुज प्रमोद !


(ii) ............... । पित्रा लिखितं (iii) ............ अद्य एव प्राप्तम् । पत्रेण (iv) ............ यत् (v) ..................... सर्वदा एव चलभाषितयन्त्रेण (vi) .............. करोति । एतत् तु न उचितम् अनेन तु समयस्य (vii) .............. भवति । पठनस्य समय: अपि (viii) .......... । अत: अस्य अति-प्रयोग: तु (ix) .............. एव । भवान् पुन: एवं कालं न नंक्ष्यति इति मम आशा अस्ति।

भवत: (x) ...............

सुबोध:

मञ्जूषा - (ज्ञातम्, भ्राता, शुभाशिष:, वार्तालापं, भवान्, हानि:, हानिकारक:, विनश्यति, पत्रम् अशोकनगरम्)

**3. अधोदत्तं चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दसहायतया पञ्चवाक्यानि लिखत -** (1 x 5 = 5)



**मञ्जूषा** - नदी, जना:, तरन्ति, वार्तालापम्, क्रीडत:, नदीतीरे, वृक्ष:, वृक्षस्य, व्यायामम, शीतलम्, जल अध:, नद्याम्)

## खण्ड: ग: (अनुप्रयुक्तव्याकरणम्) - ३० अङ्का:

**4. I. उचितवर्णेन वर्णविन्यासं कुरुत -** (1 x 2 = 2)

(i) सर्वत्र - स् + अ + ........... + व् + अ + त् + र् + अ

(ii) दिक्षु - द् + इ + क् + ........... + उ

**II. उचित वर्णेन वर्णसंयोगं कुरुत -** (1 x 2 = 2)

(i) श् + र् + आ + व् + अ + ण् + अ + म् + आ + स् + अ: = ...........वणमास:

(ii) श् + आ + स् + त् + र् + अ + म् = शा...........म्

5. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा सन्धिं सन्धिच्छेदं वा कुरुत - (1 x 4 = 4)

(i) विद्या + अर्थी सुखं त्यजेत् ।

(अ) विद्योर्थी (ब) विद्यार्थी (स) विद्यर्थी (द) विद्याअर्थी

(ii) वर्षा + ऋतु: समागत: ।

(अ) वर्षाऋतु: (ब) वर्षातु: (स) वर्षतु: (द) वर्षातु:

(iii) दयानन्द: सत्यार्थप्रकाशं रचितवान् ।

(अ) सत्यार्थ + प्रकाशं (ब) सत्य + अर्थप्रकाशं (स) सत्यार्थप्र + काशं (द) सति + अर्थप्रकाशं

(iv) महेश: हिमालये वसति ।

(अ) महा + ईश: (ब) मह + ईश: (स) महा + इश: (द) मह + इश:

6. प्रदत्तविकल्पेभ्य: उचितं विभक्तियुक्तपदं चित्वा रिक्तस्थानं पूरयत - (1 x 5 = 5)

(i) ______ पुष्पाणि पतन्ति ।

(अ) लता: (ब) लतायाम् (स) लताया: (द) लता

(ii) जना: ______ स्नानं कुर्वन्ति ।

(अ) नदी (ब) नद्यां (स) नद्या: (द) नदीभ्य:

(iii) ______ विद्यालये अद्य उत्सव: अस्ति ।

(अ) अहं (ब) मया (स) मत् (द) मम

(iv) त्वं ______ नगरे तिष्ठसि ?

(अ) किम् (ब) केन (स) कस्मात् (द) कस्मिन्

(v) वृक्षे ______ सन्ति ।

(अ) फलं (ब) फलानि (स) फलाय (द) फलात्

7. प्रदत्तविकल्पेभ्य: उचितं संख्याशब्दं चित्वा रिक्तस्थानं पूरयत - (1 x 4 = 4)

(i) ______ बालकौ गच्छत: ।

(अ) द्वयो: (ब) द्वे (स) द्वौ (द) द्वि

(ii) ______ जलाशय: गृहस्य समीपे अस्ति ।

(अ) एकस्य (ब) एकस्मिन् (स) एक: (द) एकस्मै

(iii) ______ बालिका: गीतं गायन्ति ।

(अ) त्रीणि (ब) तिस्र: (स) त्रय: (द) तिसृभि:

(iv) मम समीपे ______ पुस्तकानि सन्ति ।

(अ) चतुर् (ब) चत्वार: (स) चत्वारि (द) चतस्र:

8. प्रदत्तविकल्पेभ्य: उचितं धातुरूपं चित्वा रिक्तस्थानं पूरयत - (1 x 5 = 5)

(i) वृक्षा: सत्पुरुषा: इव ______ ।

(अ) भवति (ब) भवन्ति (स) भवथ: (द) भवाम:

(ii) बालका: विद्यालयं ____________ ।

(अ) गमिष्यति (ब) गमिष्यसि (स) गमिष्यामि (द) गमिष्यन्ति

(iii) स: नाटकम् ____________ ।

(अ) अपश्य: (ब) अपश्यम् (स) अपश्यत् (द) अपश्याम

(iv) त्वं कस्मिन् विद्यालये ____________ ?

(अ) पठति (ब) पठसि (स) पठामि (द) पठन्ति

(v) रात्रौ जना: गृहे ____________ ।

(अ) तिष्ठन्ति (ब) तिष्ठसि (स) तिष्ठामि (द) तिष्ठाव:

**9. मञ्जूषाया: उचितम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत -** (1 x 4 = 4)

(i) गृहात् ____________ उद्यानम् अस्ति ।

(ii) लता ____________ गीतं गायति ।

(iii) यदा प्रात: भवति ____________ सूर्य: उदेति ।

(iv) मार्गे ____________ भ्रमणं न उचितम् ।

(मञ्जूषा – तदा, इतस्तत:, बहि:, उच्चै:, अलम् )

**10. प्रदत्तविकल्पेभ्य: उचितं पदं चित्वा रिक्तस्थानं पूरयत -** (1 x 4 = 4)

(i) ____________ उभयत: वृक्षा सन्ति ।

(अ) ग्रामस्य (ब) ग्रामम् (स) ग्रामेण (द) ग्रामात्

(ii) ____________ सह अहम् अपि गमिष्यामि ।

(अ) त्वं (ब) तेन (स) तस्मात् (द) तस्मै

(iii) ____________ विना जीवनं वृथा ।

(अ) विद्या (ब) विद्यां (स) विद्यायै (द) विद्यासु

(iv) ____________ नम: ।

(अ) गङ्गा: (ब) गङ्गाया: (स) गङ्गायै (द) गङ्गायाम्

**खण्ड: घ: (पठित-अवबोधनम्) - ३५ अङ्का:**

**11. अधोदत्तप्रश्नानाम् उत्तराणि एकपदेन लिखत (पञ्चानाम्)-** (1 x 5 = 5)

(क) अधमा: किम् इच्छन्ति ?

(ख) चटका कै: स्वगृहं निर्मितवती ?

(ग) लौकिकसंस्कृतस्य आदिम: ग्रन्थ: क: ?

(घ) 'अष्टाध्यायी' इति व्याकरणग्रन्थस्य रचयिता क: ?

(ङ) वास्तविकं बलं किम् अस्ति ?

(च) विनयं का ददाति ?

12. अधोदत्तप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत (पञ्चानाम्)- (2 x 5 = 10)

(क) जननी जन्मभूमिश्च कस्मात् गरीयसी ?

(ख) काक: लज्जित: भूत्वा किं चिन्तयति ?

(ग) सुन्दरं गृहं दृष्ट्वा काक: चटका च किम् अचिन्तयताम् ?

(घ) वैदिकसंस्कृतस्य प्रमुखं साहित्यं किम् अस्ति ?

(ङ) अस्माकं संस्कृते: च मूलं कुत्र निहितम् ?

(च) आद्यं धर्मसाधनं किम् ?

13. अधोदत्तश्लोकस्य अन्वयं समुचितक्रमेण पूरयत - (1 x 5 = 5)

निन्दन्तु नीतिनिपुणा: यदि वा स्तुवन्तु
लक्ष्मी: समाविशतु गच्छतु वा यथेष्टम्
अद्यैव वा मरणमस्तु युगान्तरे वा
न्यायात्पथ: प्रविचलन्ति पदं न धीरा: ।।

अन्वय: - (i) ________ यदि निन्दन्तु स्तुवन्तु वा (ii) ________ समाविशतु यथेष्टं वा (iii) _______ , मरण् अद्यैव अस्तु (iv) _______ वा (v) _______ न्यायात् पथ: पदं न प्रविचलन्ति ।

14. अधोदत्तवाक्येषु रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत - (1 x 5 = 5)

(क) तौ स्वनिवासम् अगच्छताम् ।

(ख) चटका काकं कथयति ।

(ग) छात्रै: एका प्रश्नोत्तरी आयोजिता ।

(घ) जना: विद्यया नम्रतां प्राप्नुवन्ति ।

(ङ) संसारे सत्यस्य जय: भवति ।

15. पर्यायपदानि मेलयत । (1 x 5 = 5)

| | | | |
|---|---|---|---|
| (i) | प्रणेता | (क) | लिखितम् |
| (ii) | ससीक्ष्यते | (ख) | असत्यम् |
| (iii) | रचितम् | (ग) | पश्चात् |
| (iv) | अनन्तरं | (घ) | रचयिता |
| (v) | अनृतम् | (ख) | गण्यते |

18. विपरीतपदानि मेलनं कुरुत :- (1 x 5 = 5)

| | | | |
|---|---|---|---|
| (i) | खिन्ना | (क) | आगच्छतु |
| (ii) | सुखिन: | (ख) | मित्रम् |
| (iii) | गच्छतु | (ग) | परिश्रमम् |
| (iv) | आलस्यम् | (घ) | आनन्दिता |
| (v) | रिपु: | (ख) | दु:खिन: |

***************